अध्यायः 9

# सम्पन्नाः ग्रामाः समृद्धानि च नगराणि

### लौहकारस्य आपणे प्रभाकरः

प्रभाकरः लौहकारान् कार्यं कुर्वतः पश्यति स्म । एकस्यां लघ्व्याम् उत्पीठिकायां कुठारः लवित्रम् इति सदृशानि उपकरणानि विक्रयणार्थं स्थापितानि आसन् । अपरतः अग्निकुण्डं ज्वलति स्म । उपकरणानि निर्मातुं द्वौ जनौ लौहखण्डं उष्णीकृत्य तं घ्ननन्ति स्म । प्रभाकरः एतत् सर्वं दृष्ट्वा आनन्दम् अनुभवति स्म ।









उपकरणानां सूच्यां चित्रस्थोपकरणानां नामानि चिनोतु - लवित्रम्, कुठारः,संदशिका च । लौहस्य एवंविधानां पञ्चानां वस्तूनां सूचीं करोतु येषां प्रयोगं भवान् प्रतिदिनं करोति ।

### लौहोपकरणानि कृषिः च

लौहस्य प्रयोगः अद्य सामान्या घटना अस्ति । लौहस्य वस्तूनि अस्माकं दैनन्दिनजीवनस्य भागभूतानि जातानि सन्ति । एतस्मिन् उपमहाद्वीपे लौहस्य प्रयोगः प्रायः ३०००वर्षेभ्यः प्राक् आरब्धः । महापाषाण-शवस्थानेषु लौहस्य उपकरणानि शस्त्राणि च व्यापक-सङ्ख्यायाम् अलभ्यन्त । एतेषां विषये भवान् पञ्चमाध्याये पठितवान् अस्ति ।

प्रायः २५००वर्षेभ्यः पूर्वं लौहस्य उपकरणानाम् उपयोगः वर्धितः इति प्रमाणं लभ्यते । अत्र वनानि स्वच्छीकर्तुं कुठाराः तथा च कृषेः कृते हलानां फालाः सम्मिलिताः सन्ति । भवान् षष्ठाध्याये पठितवान् आसीत् यत् फालस्य प्रयोगेण कृषेः उत्पादनं वर्धितम् ।

### कृषेः उत्पादनं वर्धयितुं सम्मिलिताः अन्ये उपायाः – सेचनम्

समृद्ध-ग्रामान् विना राज्यानां राज्ञां च यथावत् अस्तित्वं कठिनाय आसीत् । यथा कृषेः विकासार्थं नूतनोपकरणानां प्रयोगः तथा च रोपणं महत्त्वपूर्णप्रयासौ आस्तां तथैव सेचनम् अपि उपयोगि इति सिद्धम् । अस्मिन् काले सेचनाय कुल्याः कूपाः तडागाः कृत्रिमजलाशयाः च निर्मिताः ।

एतस्यां तालिकायां सेचनद्वारा जातानि परिवर्तनानि दर्शितानि सन्ति । रिक्तस्थानेषु शुद्धानि वाक्यानि पूरयन्तु –

- जनैः श्रमः साधितः ।

- कृषकाः लाभान्विताः जाताः, यतो हि अधुना उत्पादनस्य अनिश्चितता समाप्ता ।
- राजस्वम् अर्पयितुं कृषकैः उत्पादनं वर्धनीयम् आसीत् ।
- राजानः सेचनस्य योजनां कृतवन्तः अपि च धनं व्ययीकृतवन्तः ।

| | |
|---|---|
| १. राज्ञे सेना-प्रासाद-दुर्गाणां च निर्माणार्थं धनानि आवश्यकानि । | २. ते कृषकेभ्यः करं गृह्णन्ति । |
| ३. | ४. इदं सेचनेन एव शक्यम् आसीत् । |
| ५ | ६ |
| ७. कृष्युत्पादनं वर्धितम् । | ८. राजस्वेन अपि वर्धितम् । |

| |
|---|
| ९. |

## ग्रामेषु के निवसन्ति स्म ?

अस्य महाद्वीपस्य दक्षिणस्य उत्तरस्य च भागानाम् अधिकांशग्रामेषु न्यूनातिन्यूनं त्रिविधाः जनाः निवसन्ति स्म । तमिलक्षेत्रे महान्तः भूस्वामिनः वेल्लला, साधारणहलवाहकान् उणवाराः अपि च भूमिहीनश्रमिकाः, दासाः कडैसियाराः तथा च अदिमयी इति उच्यन्ते स्म ।

देशस्य उत्तरभागे ग्रामस्य प्रधानजनाः ग्राम-भोजकाः इति उच्यन्ते स्म । प्रायः एकस्य एव परिवारस्य जनाः एतस्मिन् पदे बहूनि वर्षाणि यावत् विराजमानाः भवन्ति स्म । अर्थात् इदं पदम् आनुवंशिकम् आसीत् । ग्राम-भोजकस्य पदे सामान्यतया ग्रामस्य महाभूस्वामिनः विराजन्ते स्म । सामान्यतया एतेषां भूमौ एतेषां दासाः च श्रमिकाः च कार्यं कुर्वन्ति स्म । एतदतिरिच्य प्रभावयुक्तत्वात् प्रायः राजानः अपि राजधनसङ्ग्रहणस्य कार्यम् एतेभ्यः एव ददति स्म । इमे ग्रामभोजकाः कदाचित् न्यायाधीशस्य आरक्षकस्य च अपि कार्यं कुर्वन्ति स्म ।

ग्राम-भोजकान् अतिरिच्य अन्ये स्वतन्त्राः कृषकाः अपि भवन्ति स्म, ये गृहपतयः इति उच्यन्ते स्म । एतेषु अधिकतराः लघुकृषकाः एव भवन्ति स्म । एतान् अतिरिच्य केचन एतादृशाः स्त्रीपुरुषाः अपि भवन्ति स्म, येषां पार्श्वे स्वस्य भूमिः न भवति स्म । एतेषु दासाः कर्मकराः च भवन्ति स्म । यैः अन्येषां भूमौ कार्यं कृत्वा स्वाजीविका चालनीया भवति स्म ।

बहुषु ग्रामेषु लौहकाराः कुम्भकाराः काष्ठकाराः शिल्पकाराः च भवन्ति स्म ।

### प्राचीनतमाः तमिलरचनाः

तमिलस्य प्राचीनतमरचनाः संगमसाहित्यम् इति उच्यते। एतासां रचना प्रायः २३००वर्षेभ्यः पूर्वम् अभूत् । एताः संगमः इति एतस्मात् कारणात् उच्यन्ते यतो हि मदुरैस्थानकस्य (सप्तमं मानचित्रं ११३पृष्ठं च पश्यतु) कवीनां सम्मेलनेषु एतासां सङ्कलनं क्रियते स्म। ग्रामवासिनां येषां तमिलनाम्नाम् उल्लेखः अत्र कृतः अस्ति तानि सङ्गमसाहित्ये उपलभ्यन्ते ।

## नगराणि – कथाः, यात्राविवरणं मूर्तिकलाः पुरातत्त्वं च किं बोधयन्ति

भवान् जातकानां विषये पठितवान् स्यात्। एताः तादृश्यः कथाः सन्ति, याः कथाः सामान्यजनेषु प्रचलिताः आसन्। बौद्धभिक्षवः एतासां सङ्कलनं कृतवन्तः। अत्र काचित् जातककथा प्रदत्ता अस्ति या कश्चित् निर्धनः केन प्रकारेण शनैः शनैः धनवान् जातः इति ज्ञापयति । प्राचीन-नगराणां जीवनस्य विषये वयं केभ्यश्चित् अन्येभ्यः स्रोतोभ्यः अपि अवगन्तुं शक्नुमः । नगर-ग्राम-वनजीवन-सम्बद्ध-घटनाः मूर्तिकाराः कलात्मक-रूपेण उत्किरन्ति स्म । एताः मूर्तयः एतादृश- भवनानां चत्वरेषु

### कस्यचित् निर्धनस्य चातुर्यम्

कस्मिंश्चित् नगरे कश्चित् निर्धनयुवकः निवसति स्म । तस्य पार्श्वे मृतमूषकम् अतिरिच्य किमपि नासीत् । सः कस्यचित् भोजनालयस्वामिनः विडाल्याः कृते एकेन नाणकेन तं मूषकं विक्रीतवान्।

एकस्मिन् दिने पुनः तत्र प्रचण्डवातः आगतः । नृपस्य उद्यानं भग्नशाखाभिः पतितवृक्षैः पत्रैः च आच्छन्नम् । उद्यानपालः उद्यानस्य स्वच्छताकार्येण दुःखितः जातः। युवकः तं उद्यानपालम् उक्तवान् यत् यदि सः एतस्य उद्यानस्य पतितानि पत्राणि शाखाः च तस्मै दद्यात् तर्हि सः तस्य उद्यानस्य स्वच्छतां कर्तुं शक्नोति । मालाकारः शीघ्रमेव युवकस्य प्रस्तावम् अङ्गीकृतवान् ।

युवकः नातिदूरे क्रीडतः बालकान् आहूय उक्तवान् यत् यदि भवन्तः अत्र उद्यानस्य स्वच्छतां करिष्यन्ति तर्हि अहं प्रत्येकं शाखायाः पत्रस्य च परिवर्ते पारिश्रमिकरूपेण भवद्भ्यः मिष्टान्नं दास्यामि । बालकैः शीघ्रम् एव सर्वाणि अपि तृणानि शाखाः पत्राणि च चित्वा मुख्यद्वारस्य समीपे एकत्रीकृतानि । तदा तत्र कश्चित् राजकुम्भकारः ततः निरगच्छत् । सः पात्राणि निर्मातुम् ईन्धनस्य अन्वेषणं करोति स्म । सः सम्पूर्णं काष्ठचयं क्रीतवान् । अनेन प्रकारेण युवकः किञ्चित् धनम् अर्जितवान् ।

अधुना सः युवकः इतोपि काञ्चित् योजनां कल्पितवान्। कस्मिंश्चित् विशाले पात्रे सः जलं प्रपूर्य नगरस्य द्वारं गतवान् । सः तत्र पञ्चशतं घासलावकान् जनान् जलं पायितवान्।

प्रसन्नाः भूत्वा ते जनाः उक्तवन्तः "भवता अस्माकं एतावत् शोभनं कार्यं कृतम् । वदतु वयं भवतः कृते अधुना किं कर्तुं शक्नुमः" ?

सः युवकः अवदत् "अहं भवतः तदा सूचयिष्यामि यदा मम आवश्यकता भविष्यति" । तदनन्तरं सः केनचित् व्यापारिणा सह मैत्रीं सम्पादितवान् । एकस्मिन् दिने सः व्यापारी तम् अवदत् "श्वः कश्चित् अश्ववणिक् पञ्चशतेन अश्वैः सह नगरम् आगच्छन् अस्ति" ।

सः युवकः इदं श्रुत्वा तेषां घास-लावकानां समीपं गत्वा अवदत् "कृपया भवन्तः सर्वे मह्यं एकं एकं घासपोटलिकां यच्छन्तु अपि च भवन्तः स्वघासपोटलिकां तावत्पर्यन्तं न विक्रीणन्ताम्, यावत् पर्यन्तं मम घासचयः समाप्तिं न गच्छेत् । ते घासस्य लावकाः तस्मै घासस्य पञ्चशतं पोटलिकाः दत्तवन्तः। यदा अश्वस्य वणिक् कुत्रापि घासं न प्राप्तवान्, तर्हि सः तस्य युवकस्य घासं सहस्र-नाणकैः क्रीतवान् ।

अथवा स्तम्भेषु अथवा प्रवेशद्वारेषु अलङ्क्रियन्ते स्म यत्र च जनाः गमनागमनं कुर्वन्ति स्म।



देहल्यां प्राप्तः वलयकूपः।
हड़प्पायाः जल-निकास-व्यवस्थातः अयं कथं भिन्नः अस्ति ?

**अधः - साञ्च्याः मूर्तिकलाः ।**
इदं मध्यप्रदेश-स्थित-सांच्यः स्तूपस्य मूर्तिकलायाः चित्रम् अस्ति । अत्र नगरीय-जीवनस्य किमपि दृश्यं चित्रितम् अस्ति । भवान् १२अध्याये सांच्याः विषये पठिष्यति । एताः भित्तीः पश्यतु । किं ताः इष्टकाभिः निर्मिताः सन्ति अथवा पुनः काष्ठमयाः अथवा पाषाणमयाः सन्ति ? किं एतासां चत्वराः काष्ठमयाः सन्ति ? एतेषां भवनानां छदीनां वर्णनं करोतु ।



षष्ठाध्याये वर्णितानि बहूनि नगराणि महाजनपदानां राजधान्यः आसन् । यथा भवान् पठितवान् एतेषु कानिचन नगराणि प्राकारैः आवृत्ताः आसन्।

यथा भवान् उपरितने चित्रे पश्यति, अनेकनगरेषु वलयकूपाः प्राप्ताः सन्ति । एते वलयकूपाः स्नानालयस्य नालिकायाः अवकरक्षेपणस्य च कार्ये प्रयुञ्जते स्म । प्रायः एते वलयकूपाः जनानां गृहेषु भवन्ति स्म।

प्रासादानां विपणीनां सामान्यगृहाणां च अवशेषाः न्यूनतया प्राप्ताः सन्ति । सम्भवतः ते काष्ठमयाः मृण्मयाः इष्टकामयाः आच्छादकमयाः च भवन्ति स्म तस्मात् कारणात् अधिकं कालं यावत् न अवशिष्टाः । भविष्यति काले पुरातत्त्वविदः एतेषाम् अन्वेषणं कर्तुं शक्नुवन्ति।

बेरिगाजायाः (भरूचस्य यूनानी नाम) कथा

बेरिगाजायाः सङ्कीर्णखाते समुद्रमार्गेण आगन्तुकानां कृते नौकायाः चालनं महत् कठिनं भवति ।

नृपेण नियुक्ताः कुशलाः अनुभविनः च स्थानीयाः एव अत्र जलयानम् आनेतुं शक्नुवन्ति स्म । बेरोगाजायां मदिरा-ताम्र-टिन-काच-मूंगा-पुखराज-वस्त्राणां सुवर्णस्य रजतस्य च मुद्राणाम् आयातः भवति स्म ।

हिमालयस्य औषधयः, हस्तिदन्ताः, गोमेदाः, कार्नीलियनम्, कार्पासवस्त्राणि, कौशेयम् इत्राणि च इत्येतेषाम् इतः निर्यातं भवति स्म । वणिजः नृपस्य कृते विशेषेपहारान् आनयन्ति स्म । एतेषु उपहारेषु रजतस्य पात्राणि गायककिशोराः सुन्दर्यः सुमदिराः उत्कृष्टवस्त्राणि च सम्मिलितानि आसन्।

बेरिगाजातः आयातॄणां निर्यातॄणां च वस्तूनां सूचीं निर्मातु ।

एतादृश्योः द्वयोः वस्तुनोः नाम ज्ञापयतु, ययोः उपयोगः हडप्पायुगे न भवति स्म ।

प्राचीननगराणां विषये तत्र गतानां नाविकानां यात्रिणां च विवरणैः अपि अवगमनं भवति । एतादृशमेव किमपि विस्तृतविवरणं कस्यचित् अज्ञातयूनानि-नाविकस्य अस्ति। येषु येषु पत्तनेषु सः गतवान्, तेषां सर्वेषां विषये सः लिखितवान्। भरूच इति स्थानम् (सप्तमे मानचित्रे ११३ पृष्ठे) अन्विष्यतु। अधुना तत्र प्रदत्तं वर्णनं पठतु।

## निष्का

नवतितमे पृष्ठे प्रदत्तकथायां भवान् दृष्टवान् यत् केन प्रकारेण निष्काणाम् आधारेण सम्पत्तेः मूल्याङ्कनम् अभवत्। पुरातत्त्वविदः अस्य कालस्य सहस्राधिक निष्कान् लब्धवन्तः । एतेषु प्राचीनतमाः निष्काः आहत निष्काः आसन्, एते प्रायः पञ्चशतं वर्षाणि यावत् प्रचलने आसन्। एतस्य चित्रम् अधः प्रदत्तम् अस्ति। एते रजतमयेषु सुवर्णमयेषु च निष्केषु विभिन्नाकृतीः विलिख्य निर्मिताः सन्ति, तस्मात् एते निष्काः आहतनिष्काः इति उच्यन्ते स्म।



## विनिमयस्य अन्यानि साधनानि

संगम-साहित्यस्य एतां लघुकवितां पठतु ।

क्षेत्राणां श्वेतधान्यानि यानेषु आरुह्य
गच्छन्तः सन्ति
लवणस्य कृते
लम्बतराः मार्गाः
कौमुद्याः श्वेतसैकते
परिवारस्य संयोजनम्
कुत्रचित् पृष्ठतनीयाः न भवेयुः
नगरेभ्यः लवणस्य वणिजां
इत्थं गमनेन शून्यवातावरणं जायते ।

समुद्रतटे लवणस्य महत् उत्पादनं भवति स्म ।

व्यापारिणः केन वस्तुना एतस्य विनिमयं कुर्वन्ति ?
ते कथं यात्रां कुर्वन्ति ?

### नगराणि – अनेकेषां गतिविधीनां केन्द्रभूतानि आसन्

प्रायः नगराणि अनेकैः कारणैः महत्त्वपूर्णानि भवन्ति स्म । उदाहरणार्थं मथुरां (सप्तमे मानचित्रे पृष्ठम्- ११३) पश्यतु ।

२५००वर्षेभ्यः अपि अधिककालतः इदं किमपि महत्त्वपूर्णनगरम् आसीत्, यतो हि यातायातस्य व्यापारस्य च द्वयोः प्रमुखमार्गयोः स्थितम् आसीत् । एतयोः कश्चित् एकः मार्गः उत्तरपश्चिमायाः पूर्वां प्रति गन्तुम् अपरः मार्गः च उत्तरस्याः दक्षिणां प्रति गन्तुं प्रयुक्तः भवति स्म । नगरं परितः प्राकाराः आसन् । अत्र अनेकानि मन्दिराणि आसन् । पार्श्वस्थाः कृषकाः पशुपालकाः च नगरीय-जनेभ्यः भोजनसामग्र्याः व्यवस्थां कुर्वन्ति स्म । मथुरानगरम् उत्कृष्टमूर्ति-निर्माणस्य केन्द्रम् आसीत् ।

प्रायः २०००वर्षेभ्यः प्राक् मथुरा कुषाणानां राजधानी जाता । एतस्याः विषये भवान् अग्रिमे अध्याये पठिष्यति । मथुरा किमपि धार्मिककेन्द्रम् अपि अस्ति । अत्र बौद्धविहाराः जैनमन्दिराणि च सन्ति । मथुरा कृष्णभक्तेः किमपि महत्त्वपूर्णं केन्द्रम् अस्ति ।

मथुरायां प्रस्तरखण्डेषु मूर्तिषु च लिखिताः अनेके शिलालेखाः प्राप्ताः सन्ति । एते सामान्यतया सङ्क्षिप्ताभिलेखाः सन्ति, यैः स्त्रीपुरुषैः मठानां मन्दिराणां च कृते प्रदत्तदानस्य उल्लेखः क्रियते । प्रायः नगरीयाः राजानः राजमहिष्यः अधिकारिणः वणिजः शिल्पकाराः च एतादृशं दानं कुर्वन्ति स्म । उदाहरणार्थं मथुरायाः

अभिलेखेषु सुवर्णकाराणां तन्तुवायानां कण्डोलनिर्मातॄणां मालाकाराणां सौगन्धिकानां च उल्लेखः लभ्यते।

मथुरायाः जनानां व्यवसायानां च काञ्चित् सूचीं करोतु । एतादृशस्य कस्यचित् व्यवसायस्य नाम वदतु यः हडप्पायां नासीत्।

### शिल्पं शिल्पकाराः च

पुरास्थलेभ्यः शिल्पानाम् आकृतयः प्राप्ताः सन्ति । एतासु मृण्मयानि अतिसुन्दराणि पात्राणि लब्धानि सन्ति। यानि उत्तरीयाणि कृष्णवर्णानि द्युतिमन्ति पात्राणि उच्यन्ते । यतो हि एतानि आधिक्येन उपमहाद्वीपस्य उत्तरीये भागे उपलब्धानि सन्ति, तथा च एतानि प्रायः कृष्णवर्णीयानि भवन्ति। एतेषु च काचित् विशिष्टा कान्तिः भवति।

अवधातव्यं यत् अन्येषां शिल्पानाम् अवशेषाः न अवशिष्टाः स्युः । यथा विभिन्नेभ्यः ग्रन्थेभ्यः वयं जानीमः यत् वस्त्राणाम् उत्पादनं बहुमहत्त्वपूर्णम् आसीत्। उत्तरे वाराणसी दक्षिणे च मदुरैनगरम् अस्य प्रसिद्धकेन्द्रे आस्ताम्। अत्र स्त्रीपुरुषाः द्वौ अपि कार्यं कुरुतः स्म।

#### तन्तुनिर्माणस्य वयनस्य च नियमाः

एते नियमाः अर्थशास्त्रस्य सन्ति । अष्टमाध्याये अर्थशास्त्रस्य उल्लेखः कृतः अस्ति । एतस्मिन् शास्त्रे वर्णितम् अस्ति यत् केन प्रकारेण कस्यचित् विशिष्टाधिकारिणः मार्गदर्शने उद्योगेषु तन्तुनिर्माणस्य वयनस्य च कार्यं भवति स्म ।

उर्णस्य वल्कलस्य कार्पासस्य त्वक्सारस्य च सज्जी-करणस्य विधवानां सक्षमाक्षममहिलानां भिक्षुणीनां वृद्धवेश्यानां नृपस्य अवकाश-प्राप्त-दासीनां सेविकानां अवकाश-प्राप्त-देव-दासीनां च नियोजनं कर्तुं शक्यते।

एतेभ्यः उपर्युक्तेभ्यः सर्वेभ्यः गुणवत्तायाः कार्यस्य च अनुसारं पारिश्रमिकं दातव्यम् । याः महिलाः बहिर्गन्तुं अनुमताः न सन्ति ताः स्वस्य दासीः प्रेष्य असंशोधितसामग्रीम् आनाययितुं शक्नुवन्ति, अपि च सिद्धसामग्रीं तासां माध्यमेन प्रेषयितुं शक्नुवन्ति ।

याः महिलाः उद्योगगृहाणि यावत् गन्तुं शक्नुवन्ति ताभिः सामग्री प्रातःकाले एव उद्योगगृहं प्रति नेतव्या भवति स्म, यत्र ताः पारिश्रमिकं प्राप्नुवन्ति स्म । यतो हि प्रातःकाले सामग्रीः निरीक्षितुं पर्याप्तप्रकाशः भवति । यदि निरीक्षकः तां महिलां प्रति कुदृष्ट्या पश्यति अथवा व्यर्थवार्तालापं करोति तर्हि सः दण्डनीयः भवेत् ।

यदि महिलया स्वकार्यं पूर्णं न कृतम्, तर्हि तया दण्डशुल्कः दातव्यः भवति स्म । एतदर्थं तस्याः अंगुष्ठः अपि कर्तयितुं शक्यते ।

तासां महिलानां सूचीं करोतु याः महिलाः निरीक्षकः नियोजयितुं शक्नोति स्म ।

किं कार्यकाले महिलाभिः कष्टानि सोढव्यानि भवन्ति स्म ?

अनेके शिल्पकाराः वणिजः च स्वस्य सङ्घान् निर्मातुम् आरब्धवन्तः आसन्, याः श्रेण्यः इति उच्यन्ते स्म। शिल्पकाराणां श्रेणीनां कार्यं प्रशिक्षणम् असाधितसाम्रग्र्याः उपलब्धता सिद्धसामग्र्याः च वितरणम् आसीत्। यद्यपि वणिजाम् श्रेण्यः वाणिज्यस्य सञ्चालनं कुर्वन्ति स्म। तथापि श्रेण्यः वित्तकोशानां रूपेण कार्यं कुर्वन्ति स्म, यत्र जनाः धनं संगृह्णन्ति स्म। एतस्य धनस्य निवेशः लाभाय क्रियते स्म। प्राप्तलाभस्य कश्चित् भागः सङ्ग्रहितुः कृते प्रत्यावर्त्यते स्म अथवा मठादि-धार्मिक-संस्थानेभ्यः दीयते स्म।

## सूक्ष्मनिरीक्षणम् – अरिकामेडुः

सप्तमे मानचित्रे (पृष्ठम्- ११३) अरिकामेडुनगरम् (पाण्डुचेर्याम्) अन्विष्यतु। षण्णवतितमे पृष्ठे रोमस्य विषये प्रदत्तां सूचनां पठतु। प्रायः २२००तः १९००वर्षेभ्यः पूर्वम् अरिकामेडु इति किमपि पत्तनम् आसीत्। यत्र दूरेभ्यः आगतेभ्यः जलपोतेभ्यः वस्तूनि अवतार्यन्ते स्म। अत्र इष्टिका-निर्मितः कश्चन भवनावशेषः (स्थापत्यावशेषः) उपलब्धः अस्ति, अत्र भूमध्यसागर-क्षेत्रस्य एंफोरासदृशानि पात्राणि प्राप्तानि सन्ति। एतेषु मदिरातैलसदृशाः तरलपदार्थाः स्थापयितुं शक्यन्ते स्म। एतेषु द्वाभ्यां पक्षाभ्यां ग्रहीतुं मुष्टिकाः संश्लिष्टाः आसन्। एतेन सहैव अत्र "एरेटाइनसदृशानि मुद्रितरक्त-भासमानानि पात्राणि अपि उपलब्धानि सन्ति। एतानि इटलीदेशस्य कस्यचित् नगरस्य नाम्नि एरेटाइन इति पात्रनाम्नः अवगम्यन्ते। एतानि पात्राणि मुद्रिताकारे क्लिन्नमृत्तिकाम् उपमृद्य निर्मीयन्ते स्म। कानिचन एतादृशानि पात्राणि अपि लब्धानि सन्ति येषां प्रारूपं तु रोमस्य आसीत्, किन्तु तानि अत्र एव निर्मितानि आसन्। अत्र रोमनदीपाः काचपात्राणि रत्नानि च लब्धानि सन्ति।

सहैव लघुकुण्डानि अपि लब्धानि सन्ति यानि सम्भवतः वस्त्राणि चित्रयितुं स्युः। अत्र काचेन अर्ध-बहुमूल्यपाषाणैः मणिकानां निर्माणस्य पर्याप्तसाक्ष्याणि प्राप्तानि सन्ति।



**अभिलिखितानि मृण्मयभाजनानि।**
केषुचित् भाजनेषु ब्राह्मीलिप्या लेखिताः अभिलेखाः प्राप्ताः सन्ति। आदौ तमिलभाषायाः कृते एतस्याः एव लिप्याः प्रयोगः क्रियते स्म। अतः एव एते तमिल-ब्राह्म्यभिलेखाः

रोमेन सह यानि साक्ष्याणि सम्बन्धं दर्शयन्ति तेषां सूचीं रचयतु।

## अन्यत्र



एक्वाडक्ट इति

षष्ठ मानचित्रे (पृष्ठम्-८४) रोममहानगरम् अन्विष्यतु । इदं यूरोपस्य प्राचीनतमेषु महानगरेषु अस्ति । एतस्य विकासः प्रायः तदा अभूत्, यदा गङ्गायाः क्षेत्रस्य नगराणि वसन्ति स्म । रोमः कस्यचित् महत्तमस्य साम्राज्यस्य राजधानी आसीत् । इदं साम्राज्यं यूरोपं उत्तराफ्रीकां पश्चिमेशियां यावत् च प्रथितम् आसीत् । एतस्य महत्त्वपूर्णेषु शासकेषु कश्चित् आगस्टसः प्रायः २०००वर्षेभ्यः पूर्वं शासनं कृतवान् । तेन उक्तम् आसीत् यत् रोमः इष्टिकामयनगरम् आसीत्, तद् मया संगमरमरपाषाणैः निर्मापितम् । आगस्टसः तत्पश्चाज्जाताः शासकाः च अनेकेषां मन्दिराणां भवनानाम् च निर्माणं कारितवन्तः । आगस्टसः महान्ति रङ्गमण्डलानि (एम्फिथियेटर इति) निर्मापितवान् । तानि परितः उपवेष्टुं सोपानाकारं स्थानं भवति स्म । अत्र जनाः विभिन्नप्रकारकान् कार्यक्रमान् द्रष्टुं शक्नुवन्ति स्म । ते शासकाः स्नानालयान् अपि निर्मापितवन्तः, अत्र स्त्रीणां पुरुषाणां च कृते स्नातुं पृथक्-पृथक्कालः निर्धारितः आसीत्, अत्र जनाः परस्परं मिलन्ति स्म, विश्रान्तिं च कुर्वन्ति स्म । तत्र महद्भिः दीर्घैः जलवाहिसेतुभिः (एक्वाडक्ट) नगरस्य स्नानालयानां जलप्रपातानां शौचालयानां च कृते जलम् आनयन्ति स्म ।

एतानि दीर्घतमानि रङ्गमण्डलानि (एम्फीथियेटर) जलवाहिसेतवः च एतावन्ति दिनानि यावत् कथम् अवशिष्टानि सुरक्षितानि च सन्ति ?

## कल्पयतु

भवान् बेरिगाजायां निवसति अपि च पत्तनम् द्रष्टुम् आगतवान् अस्ति।
भवान् किं किं द्रष्टुं शक्तवान् ?

## आगच्छन्तु स्मरणं कुर्मः



उपयोगि-शब्दाः
लौहः
ग्रामः
सेचनम्
सङ्गमः
नगरम्
वलयकूपः
पत्तनम्
श्रेणी

१. रिक्तस्थानानि पूरयतु –

क) तमिले महाभूस्वामी ________ उच्यते ।

ख) ग्राम-भोजकानां भूमौ प्रायः ____________ द्वारा कृषिः क्रियते स्म ।

ग) तमिले हलचालकः ________ उच्यते स्म ।

घ) अधिकसंख्याकाः गृहपतयः ___________ भूस्वामिनः भवन्ति स्म ।

२. ग्रामभोजकानां कार्याणि ज्ञापयतु । ते शक्तिशालिनः किमर्थम् आसन् ?

३. ग्रामेषु नगरेषु च वसतां शिल्पकाराणां सूचीं निर्मातु ।

४. समीचीनानि उत्तराणि अन्विष्यतु –

क) वलयकूपस्य उपयोगः

- स्नातुम्
- वस्त्राणि प्रक्षालयितुम्
- सेचितुम्
- जलनिकासाय क्रियते स्म ।

ख) आहतमुद्राः नाणकानि वा

- रजतम्
- सुवर्णम्
- त्रपुः (टिन इति)
- हस्तिदन्त-निर्मितानि भवन्ति स्म ।

ग) मथुरा-महत्त्वपूर्णम्

- ग्रामः
- पत्तनम्
- धार्मिक-केन्द्रम्
- वनक्षेत्रम् आसीत् ।

घ) श्रेणी

- शासकानाम्

**काञ्चन महत्त्वपूर्णतिथयः**

- उपमहाद्वीपस्य लौहस्य प्रयोगस्य आरम्भः (प्रायः ३०००वर्षेभ्यः पूर्वम्)
- लौहनिर्मितवस्तूनां प्रयोगस्य वर्धनम्, नगरम्,आहतमुद्राः (सिक्के) इति (प्रायः २५००वर्षेभ्यः पूर्वम्)
- संगमसाहित्यस्य रचनायाः आरम्भः (प्रायः २३००वर्षेभ्यः पूर्वम्)
- अरिकामेडोः पत्तनम् (प्रायः २२००-१९०० वर्षेभ्यः पूर्वम्)

- शिल्पकाराणाम्
- कृषकाणाम्
- पशुपालकानां सङ्घः भवति स्म।

## आगच्छन्तु चर्चां कुर्मः



५. ८७पृष्ठे दर्शितेषु लौहोपकरणेषु कृष्यर्थं कानि उपकरणानि महत्त्वपूर्णानि भविष्यन्ति ? दर्शितानि अन्यानि उपकरणानि कस्मिन् कार्ये प्रयुक्तानि स्युः ?

६. भवान् स्वनगरस्य जलनिकास-व्यवस्थायाः तुलनां तेषां नगराणां व्यवस्थया करोतु, यासां विषये भवान् पठितवान् अस्ति। एतासु भवान् काः काः समानताः अपि च काः काः असमानताः दृष्टवान् ?

## आगच्छन्तु कृत्वा पश्यामः



७. यदि भवान् कमपि शिल्पकारं कार्यं कुर्वन्तं दृष्टवान् अस्ति, तर्हि कैश्चित् वाक्यैः तद्विषयकं वर्णनं करोतु। (सङ्केतः - ते शिल्पकाराः असंशोधित-सामग्रीं कुतः प्राप्नुवन्ति। कीदृशानाम् उपकरणानां ते शिल्पकाराः प्रयोगं कुर्वन्ति। संशोधितसामग्र्या तैः किं क्रियते इत्यादि)

८. स्वग्राम्यजनानाम् अथवा नगरीयजनानां कार्याणां सूचीं करोतु। मथुरायां क्रियमाणेषु कार्येषु एतानि कथं समानानि कथं भिन्नानि च सन्ति ?

इति नवमोध्यायः